श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमल्लाङ्गूलास्त्रस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमल्लाङ्गूलास्त्रस्तोत्रम् ॥

श्रीमन्तं हनुमन्तमार्तरिपुभिद्भूभृत्तटभ्राजितं
चाल्पद्वालधिबन्धवैरिनिचयं चामीकराद्रिप्रभम्।
अग्र्यं रक्तपिशङ्गनेत्रनलिनं भ्रूभङ्गभङ्गस्फुरत्
प्रोद्यच्चण्ड मयूखमण्डलमुखं दुःखापहं दुःखिनाम्॥

कौपीनं कटिसूत्र मौञ्ज्यजिन युग्देहं विदेहात्मजा -
प्राणाधीशपदारविन्दनिरतं स्वान्तः कृतान्तं द्विषाम्।
ध्यात्वैवं समराङ्गणस्थितमथानीय स्वहृत्पङ्कजे
संपूज्याखिलपूजनोक्तविधिना सम्प्रार्थयेदर्चितम्॥

हनुमन्नञ्जनीसूनो महाबलपराक्रम।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 1 ॥

मर्कटाधिप मार्तण्डमण्डलग्रासकारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 2 ॥

अक्षक्षपण पिङ्गाक्ष दितिजासुक्षयङ्कर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 3 ॥

रुद्रावतारसंसारदुःखभारापहारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 4 ॥

श्रीरामचरणाम्भोजमधुपायितमानस।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 5 ॥

वालिप्रमथनक्लान्तसुग्रीवोन्मोचनप्रभो।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 6॥

सीताविरहवारीशभग्नसीतेशतारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 7॥

रक्षोराजप्रतापाग्निदह्यमानजगद्वन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 8॥

ग्रस्ताशेषजगत्स्वास्थ्य राक्षसाम्भोधिमन्दर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 9॥

पुच्छगुच्छस्फुरद्वीर जगद्दग्धारिपत्तन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 10॥

जगन्मनोदुरुल्लङ्घ्यपारावारविलङ्घन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 11॥

स्मृतमात्रसमस्तेष्टपूरक प्रणतप्रिय।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 12॥

रात्रिञ्चरतमोरात्रिकृन्तनैकविकर्तन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 13॥

जानक्या जानकीजानेः प्रेमपात्र परन्तप।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 14॥

भीमादिकमहाभीमवीरावेशावतारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 15॥

वैदेहीविरहक्लान्तरामरोषैकविग्रह।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 16 ॥

वज्राङ्गनखदंष्ट्रेश वज्रिवज्रावगुण्ठन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 17 ॥

अखर्वगर्वगन्धर्वपर्वतोद्भेदनस्वर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 18 ॥

लक्ष्मणप्राणसन्त्राण त्राततीक्ष्णकरान्वय।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 19 ॥

रामादिविप्रयोगार्त भरताद्यार्तिनाशन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 20 ॥

द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ 21 ॥

सीताशीर्वादसम्पन्न समस्तावयवाक्षत।
लोललाङ्गूलपातेन ममारातीन्निपातय॥ 22 ॥

इत्येवमश्वत्थतलोपविष्टः
शत्रुञ्जयं नाम पठेत्स्वयं यः।
स शीघ्रमेवास्तसमस्तशत्रुः
प्रमोदते मारुतजप्रसादात्॥ 23 ॥

॥ श्री हनुमल्लाङ्गूलास्त्रस्तोत्रं समाप्तम्॥